## 85 - पञ्चाशीतितम दशकम्
## जरासन्ध वधम्, शिशुपाल वधम् च

ततो मगध भूभृता चिर निरोध संक्लेशितं
शताष्टक युतायुत द्वितय मीश भूमी भृताम् ।
अनाथ शरणाय ते कमपि पूरुषं प्राहिणोत्
अयाचत स मागध क्षपण मेव किं भूयसा ॥ ॥85-1॥

यियासु रभिमागधं तदनु नारदो दीरितात्
युधिष्ठिर मखोद्यमात् उभय कार्य पर्याकुलः ।
विरुद्ध जयिनोऽध्वरात् उभय सिद्धि रित्युद्धवे
शशंसुषि निजैस् समं पुर मियेथ यौधिष्ठिरीम् ॥ ॥85-2॥

अशेष दयिता युते त्वयि समागते धर्मजो
विजित्य सहजैर् महीं भव दपाङ्ग संवर्धितैः ।
श्रियं निरुपमां वहन् अहह भक्त दासायितं
भवन्त मयि मागधे प्रहितवान् सभी मार्जुनम् ॥ ॥85-3॥

गिरि व्रज पुरं गताः तदनु देव यूयं त्रयो
ययाच समरोत्सवं द्विज मिषेण तं मागधम् ।
अपूर्ण सुकृतं त्वमुं पवन जेन संग्रामयन्
निरीक्ष्य सह जिष्णुना त्वमपि राज युद्ध्वा स्थितः ॥ ॥85-4॥

अशान्त समरोद्धतं विटप पाटना संज्ञया
निपात्य जरसस् सुतं पवन जेन निष्पाटितम् ।
विमुच्य नृपतीन् मुदा समनुगृह्य भक्तिं परां
दिदेशिथ गतस् स्पृहान् अपि च धर्म गुप्त्यै भुवः ॥ ॥85-5॥

प्रचक्रुषि युधिष्ठिरे तदनु राजसूयाध्वरं
प्रसन्न भृतकी भवत् सकल राजक व्याकुलम् ।
त्व मप्ययि जगत्पते द्विज पदावने जादिकं
चकर्थ किमु कथ्यते नृपवरस्य भाग्योन्नतिः ॥ ॥85-6॥

ततस् सवन कर्मणि प्रवर मग्र पूजा विधिं
विचार्य सहदेव वाक् अनुगतस् स धर्मात्मजः ।
व्यधत्त भवते मुदा सदसि विश्व भूतात्मने
तदा स सुर मानुषं भुवन मेव तृप्तिं दधौ ॥ ॥85-7॥

ततस् सपदि चेदिपो मुनि नृपेषु तिष्ठत्स्वहो
सभा जयति को जडः पशुप दुर्दुरूटं वटुम् ।
इति त्वयि स दुर्वचो वितति मुद्वमन् नासनात्
उदापत दुदायुधः समपतन् नमुं पाण्डवाः ॥ ॥85-8॥

निवार्य निज पक्षगान् अभिमुखस्य विद्वेषिणः
त्वमेव जहृषे शिरो दनुज दारिणा स्वारिणा ।
जनुस् त्रितय लब्धया सतत चिन्तया शुद्ध धीः
त्वया स परमेकताम् अधृत योगिनां दुर्लभाम् ॥ ॥85-9॥

ततस् सुमहिते त्वया क्रतुवरे निरूढे जनः
ययौ जयति धर्मजो जयति कृष्ण रित्यालपन्।
खलस् स तु सुयोधनः धुतमनास् सपत्न श्रिया
मयार्पित सभा मुखे स्थल जल भ्रमा दभ्रमीत् ॥ ॥85-10॥

तदा हसित मुत्थितं द्रुपद नन्दना भीमयो:
अपाङ्ग कलया विभो किमपि ताव-दुज्जृम्भयन् ।
धरा भर निराकृतौ सपदि नाम बीजं वपन्
जनार्दन मरुत्पुरी निलय पाहिमा मामयात् ॥ ॥85-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥

॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥